# svAnubhUtiprakAshikA

# સ્વાનુભૂતિપ્રકાશિકા

## Document Information

Text title : svAnubhUtiprakAshikA

File name : svAnubhUtiprakAshikA.itx

Category : major_works, sadAshivabrahmendra

Location : doc_z_misc_major_works

Author : Sadashivendra Sarasvati

Proofread by : Sunder Hattangadi

Latest update : December 2, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# સ્વાનુભૂતિપ્રકાશિકા

ગૌરીપતિપદભજનક્રકચવિલૂનૈકવિષયપાશોઽહમ્ ।
દેશિકવરકરુણોદિતપરજીવાત્મૈક્યતત્ત્વબોધોઽહમ્ ॥ ૧॥

પ્રશમિતનિજમાયોઽહં પ્રગલિતજગદીશજીવભેદોઽહમ્ ।
પ્રત્યગભિન્નપરોઽહં પ્રવિતતસુખપૂર્ણસંવિદેવાહમ્ ॥ ૨॥

સમુદસ્તાશ્રમકોઽહં વિધ્વસ્તાશેષવિધિનિષેધોઽહમ્ ।
અસ્તમિતાહન્તોઽહં નિસ્તુલદૃગ્રૂપવસ્તુમાત્રોઽહમ્ ॥ ૩॥

સાક્ષ્યહમનપેક્ષોઽહં પક્ષવિપક્ષાદિભેદવિધુરોઽહમ્ ।
સૂક્ષ્મોઽહમક્ષરોઽહં મોક્ષાનન્દૈકસિન્ધુરેવાહમ્ ॥ ૪॥

કૂટસ્થચેતનોઽહં કુક્ષિસ્થાનેકલોકકલનોઽહમ્ ।
એકોઽહમવિકલોઽહં કેવલસન્માત્રસારભૂતોઽહમ્ ॥ ૫॥

વેદ્યોઽહમાગમાન્તૈરાદ્યોઽહં સકલભુવનહૃદ્યોઽહમ્ ।
વિભુરહમનવદ્યોઽહં શુભતરભાવોઽહમપ્રભેદ્યોઽહમ્ ॥ ૬॥

શુદ્ધોઽહમદ્વયોઽહં બુદ્ધો મુક્તોઽહમદ્ભુતાત્માહમ્ ।
શોધિતપરતત્ત્વોઽહં બોધાનન્દૈકમૂર્તિરેવાહમ્ ॥ ૭॥

શાન્તોઽહમાન્તરોઽહં સન્તતભાતોઽહમન્તકારોઽહમ્ ।
શમિતાન્તત્રિતયોઽહં શાશ્વતવિજ્ઞાનસમરસાત્માહમ્ ॥ ૮॥

અજરોઽહમવ્યયોઽહં નિજમહમનિશં સ્થિતોઽહમચલોઽહમ્ ।
અવબોધૈકરસોઽહં કવિવરસંસેવ્યકેવલાત્માહમ્ ॥ ૯॥

નિસ્ત્રૈગુણ્યપદોઽહં નિષ્ક્રિયધામાહમપ્રતર્ક્યોઽહમ્ ।
નિરવયવોઽહમજોઽહં નિર્મલનિર્વાણમૂર્તિરેવાહમ્ ॥ ૧૦॥

નિરવધિનિજબોધોઽહં નિરુપમનિઃસીમસત્ત્વમાત્રોઽહમ્ ।
પરમાનન્દઘનોઽહં પરશિવ એવાહમનિશમભયોઽહમ્ ॥ ૧૧॥

ઇતિ શ્રીસદાશિવેન્દ્રસરસ્વત્યા વિરચિતા સ્વાનુભૂતિપ્રકાશિકા સમાપ્તા ।

Proofread by Sunder Hattangadi

*svAnubhUtiprakAshikA*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*